National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(62): 207-208
© 2025 NJHSR
www.sanskritarticle.com

**Dr. Markanda Nayak**
Asst. Professor in Sanskrit
S.C.S. College, Puri, Odihsa

**Correspondence:**
**Dr. Markanda Nayak**
Asst. Professor in Sanskrit
S.C.S. College, Puri, Odihsa

# श्रीरामानुजविश्वनाथपादयोः जीवतत्वविचारः

**Dr. Markanda Nayak**

अथ कोऽयं जीवः? किञ्चास्य स्वरूपमिति प्रश्नस्तु एक एव, परम् उत्तराणि अत्र अनेकानि सन्ति। जीवस्य स्वरूपम् अन्तःकरणावच्छिन्नचैतन्यम्, अन्तःकरणप्रतिबिम्बितं चैतन्यम्, अन्तःकरणाभासचैतन्यं वा जीवो भवति। सोऽयं जीवो जाग्रत्-स्वप्न-सुषुप्त्यिवस्थाः त्रयवान्। सम्प्रदायान्तरे मायावादिभिः जीवस्य एकत्व-अनेकत्वव्यवस्था परिकल्पिता। उपाधिभेदम् ऊररीकृत्य तेषामयम् आशयः उपाधिभूतायाः अविद्यायाः एकत्वात् तदुपहितस्य जीवचैतन्यस्य एकत्वम्। उपाधिभूतस्य अन्तःकरणस्य नानात्वात् तदुपहितस्य जीवचैतन्यस्य नानात्वमिति व्यवस्था। परन्तु वैष्णवदर्शने आचार्यरामामुजप्रभृतिभिः जीवस्य नानात्वम् अङ्गीकृतम्। जीवस्यैव अन्तःकरणोपाधिसंसर्गात् तत्तत्प्राणिकृतकर्मानुसारेण जीवेषु तारतम्यः संसारे परिलक्ष्यते। एष जीवः साक्षात् भगवतो वासुदेवस्य अंशभूतः, यथा-अग्नेः विस्फूलिङ्गा भवन्ति, इमे संसरणशीलजीवा भगवद्वासुदेवस्यांशविशेषा भवन्ति। तदुक्तम्-

**ममैवांशो जीवलोके जीवभूतः सनातनः।**
**मनः षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ।।**[२]

एतस्मिन् सन्दर्भे रामानुजाचार्या कथयन्ति-जीवात्मा द्विविधो भवति। एकः अविद्यायुक्तो देवमनुष्यादिप्रकृतिपरिणामविशेषशरीरस्थो मनासिं कर्षति। अपरः अविद्यारहितः सर्वसंसर्गासंस्पृष्टः स्वेन रूपेण अवतिष्ठते। पुनश्च जीवः स्वांशविभिन्नांशभेदेन द्विविधो भवति। विस्फूलिङ्गाः सदृशा जीवा नित्याः सनातनाश्च भवन्ति। स्वांशजीवस्तु सदा मुक्तस्वरूप एव तदुक्तं श्रीमद्भागवते-

**एकस्यैव ममांशस्य जीवस्यैव महामते।**
**बन्धोऽस्याविद्ययानादिर्विद्यया च तथेतरः।।**[३]

इन्द्रियाणि तत्तज्जीवं विविधैः प्रकारैः बध्नन्ति। उदिते स्वस्वरूपज्ञाने स एव बद्धो मुक्तो भवति-

**मन एव मनुष्याणां कारणं बन्धमोक्षयोः।**
**बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतमिति ।।**[४]

अन्वर्थं भजते। अस्य जीवस्य विविधकर्त्तृत्वादिकं लोके सम्भवति। भगवतः सेवकरूपेण माता-पिता-भ्राता-भगिन्यादिरूपेण कर्त्तृत्वम् अनुतिष्ठति। अयमेव जीवो विविधसम्बन्धमाधारीकृत्य अनेकधा व्यपदिष्टो भवति। यथा-एक एव पुरुषो भर्ता-कर्ता-पिता-मातुल-जामातृत्वादिभिः धर्मैः युक्तः अनेकधा व्यपदिष्टो भवति। तथैव अयं जीवो मन-बुद्धि-चित्त-अहङ्कार-इन्द्रियादिभिः सह च सम्प्राप्य नानात्वेन व्यवहरति।

पुनश्च जीवस्य स्वरूपं विशिष्टाद्वैतिना श्रीवेदान्तदेशिकेन एवं निरूपितं यत्-

**धीर्नित्या यस्य पक्षे प्रसरति बहुधाऽर्थेषु सैवेन्द्रियाद्यैः**
**तेनाऽऽत्माऽजागलस्थस्तन इव किमिह स्वीक्रियेतेति चेन्न।**
**कल्प्यं चेदात्मतत्त्वं कथयितुमुचितं लाघवं तत्र युक्त्या**
**नित्या सा यस्य तद्वानपि निगममितो गौरवं नास्य भारः।।**[५]

अनेन श्लोकेन आत्मनो ज्ञानाश्रयत्वं प्रतिपादितम्। तत्र चिच्छब्दवाच्यं जीवात्मनः परमात्मनः सकाशाद् भिन्ना नित्याश्च। तथा च श्रुतिः-'द्वा सुपर्णा सयुजा सखाया'[६] इत्यादिका।

अत एवोक्तं 'नानात्मानो व्यवस्थातः'[७] इति तन्नित्यत्वमपि श्रुतिप्रसिद्धम्-

**न जायते म्रियते वा विपश्चि-**
**न्नायं कुतश्चिन्न बभूव कश्चित्।**
**अजो नित्यः शाश्वतोऽयं पुराणो**
**न हन्यते हन्यमाने शरीरे।।**[८] इति।

अपरथा कृतप्रणाशाकृताभ्यागमप्रसङ्गः। अत एवोक्तम्- 'वीतरागजन्मादर्शनात्'९ इति। तदणुत्वमपि श्रुतिप्रसिद्धम्-

**बालाग्रशतभागस्य शतधा कल्पितस्य च।**
**भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते।।**[१०] **इति।**

'आराग्रमात्रः पुरुषः'[११], 'अणुरात्मा चेतसा वेदितव्यः'[१२] इति च।

तत्र चिद्रूपाणां जीवात्मनामसंकुचितापरिच्छिन्ननिर्मलज्ञानरूपाणाम् अनादिकर्मरूपाविद्या-वेष्टितानां तत्ततकर्मानुरूपज्ञानसङ्कोचविकाशौ भोग्यभूताचित्संसर्गस्तदनुगुणसुखदुःखोपभोगद्वयरूपा भोक्तृता भगवत्प्रतिपत्तिर्भगवत्पदप्राप्तिरित्यादयः स्वभावाः। इत्थं विशिष्टाद्वैतवेदान्ते जीवस्य स्वरूपं स्वभावः परिणामश्च वर्ण्यते ।

परन्तु विश्वनाथपादस्य वाक्येन जीवो द्विविधः-स्वांशो विभिन्नांशश्च। गौडीयवैष्णव- दर्शनानुसारेण जीवस्य स्वरूपं स्वभावः परिणामश्च एवं प्रतिपाद्यते, यथा-

**अणुचैतन्यरूपत्वज्ञानित्वाद्यविशेषतः।**
**साम्ये सत्यपि जीवानां तारतम्यञ्च साधनात् ।।**[१३]

पुनश्च तस्य परिणामः श्रुतौ उक्तम्-

**बालाग्रशतभागस्य शतधा कल्पितस्य च।**
**भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते ।।**[१४]

चैतन्यरूपत्वं ज्ञानित्वादिकञ्च षट् प्रश्न्यां श्रुतौ एव तस्य समाधानं दीयते-'एष हि द्रष्टा स्प्रष्टा श्रोता घ्रता रसयिता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः स परेऽक्षर आत्मनि सम्प्रतिष्ठते।'[१५] । अथ जीवानां भगवद्दासत्वं श्रुतौ प्रतिपाद्यते-

**तमीश्वराणां परमं महेश्वरं**
**तं दैवतानां परमञ्च दैवतम्।**
**पतिं पतीनां परमं परस्ताद्**
**विदाम देवं भुवनेशमीड्यम्।।**[१६]

पुनश्च जीवानां भगवतो विष्णुतो भेदः श्रुतौ निरूप्यते-

**द्वा सुपर्णा सयुजा सखाया**
**समानं वृक्षं परिषस्वजाते।**
**तयोरन्यः पिप्पलं स्वाद्वत्त्य-**
**नश्नन्नन्योऽभिचाकशीति।।**
**समाने वृक्षे पुरुषो निमग्नो**
**ह्यनीशया शोचति मुह्यमानः।**
**जुष्टं यदा पश्यत्यन्यमीश-**
**मस्य महिमानमेति वीतशोकः।।**[१७]

एवमेव गौडीयवेदान्तदृष्ट्या जीवस्य स्वरूपं स्वभावः परिणामः भगवद्दासत्वं भेदश्च समासेन प्रतिपादितः। अत्रायं निष्कर्षो रामानुजाचार्यविश्वनाथपादाभ्यां वैष्णववेदान्तसिद्धान्तमर्यदयोः जीवस्य स्वरूपं भगवतो विभिन्नांशरूपमिति प्रतिपादितम्। यत्किमपि वा भवतु जीवः स्वरूपतो नित्यः तस्यैव अविद्यासंसर्गात् बद्धभाक्त्वं मुक्तत्वञ्च भवति ।

**पादटिप्पन्यः-**

1 तत्रैव-च.अ.पा.टि. १३८
2 तत्रैव-च.अ.पा.टि. १४०
3 तत्रैव-द्वि.अ.पा.टि. ३०६
4 त.मु.क.जी.स.-४
5 तत्रैव-च.अ.पा.टि. २७
6 वै.सू.३।२।२०
7 क.उ. १।२।१८
8 न्या.सू. ३।१।२५
9 तत्रैव-द्वि.अ.पा.टि. ३२१, च.अ.पा.टि. २१२
10 श्वे.उ. ५।८
11 मु.उ. ३।१।९
12 तत्रैव-द्वि.अ.पा.टि. ७
13 तत्रैव-द्वि.अ.पा.टि. ३२१, च.अ.पा.टि.
14 २१२, प.अ.पा.टि. १०
15 श्वे.उ. ४।९
16 तत्रैव-द्वि.अ.पा.टि. १४०
17 श्वे.उ. ४।६-७